# nirvaaNa ShaTkam

शिवोहं शिवोहं, शिवोहं शिवोहं, शिवोहं शिवोहं

मनो बुध्यहंकार चित्तानि नाहं
न च श्रोत्र जिहवा न च घ्राणनेत्रम् ।
न च व्योम भूमिर्-न तेजो न वायुः
चिदानंद रूपः शिवोहं शिवोहम् ॥ १ ॥

अहं प्राण संज्ञो न वैपंच वायुः
न वा सप्तधातुर्-न वा पंच कोशाः ।
नवाक्पाणि पादौ न चोपस्थ पायू
चिदानंद रूपः शिवोहं शिवोहम् ॥ २ ॥

न मे द्वेषरागौ न मे लोभमोहो
मदो नैव मे नैव मात्सर्यभावः ।
न धर्मो न चार्धो न कामो न मोक्षः
चिदानंद रूपः शिवोहं शिवोहम् ॥ ३ ॥

न पुण्यं न पापं न सौख्यं न दुःखं
न मंत्रो न तीर्धं न वेदा न यज्ञः ।
अहं भोजनं नैव भोज्यं न भोक्ता
चिदानंद रूपः शिवोहं शिवोहम् ॥ ४ ॥

अहं निर्विकल्पो निराकार रूपो
विभूत्वाच्च सर्वत्र सर्वेद्रियाणाम् ।
न वा बंधनं नैव मुक्ति न बंधः ।
चिदानंद रूपः शिवोहं शिवोहम् ॥ ५ ॥

न मृत्युर्-न शंका न मे जाति भेदः
पिता नैव मे नैव माता न जन्म ।
न बंधुर्-न मित्रं गुरुर्नैव शिष्यः
चिदानंद रूपः शिवोहं शिवोहम् ॥ ६ ॥

शिवोहं शिवोहं, शिवोहं शिवोहं, शिवोहं शिवोहं

Web Url: http://www.vignanam.org/veda/nirvaana-shatkam-hindi.html